नं० १०२८-च

अथर्ववेदे

गरुडोपनिषत् (उपनिषद्)

पत्रे २ (द्वे) (सम्पूर्णम्)

नं० १०२८-च

2

ॐ अथ गरुडोपनिषन्महामंत्रस्य ब्रह्माऋ
षिः सिरसि अमृतागायत्रीछंदः मुखे श्रीमहा
विष्णुर्गरुडात्मा देवतायैतद्‌हृदये हलो बीजानि गु
ह्येस्वराः शक्तयः पादयोः यद्बीजं गुह्ये ॐ शक्तिः
पादयोः द्कीलकं नाभौ मंत्रोक्त विषनाशार्थे
जपे विनियोगः सर्वांगेषु ॐ खगोत्तमाय विद्
म्हे वैनतेयाय धीमहि तन्नस्तार्क्ष्यः प्रचोदया
त् ॐ अथ न्यासः गरुडाय नमः अंगुष्ठाभ्यां
ॐ वैनतेयाय तर्जनीभ्यां नमः ॐ महातार्क्ष्या
य मध्यमाभ्यां नमः ॐ खगोत्तमाय अनामिका
भ्यां नमः ॐ छंदोमयाय कनिष्ठिकाभ्यां नमः
ॐ नागालंकृतशरीराय करतलकरपृष्ठाभ्यां
नमः ॐ गरुडात्मने हृदयाय नमः ॐ वैनतेया
य सिरसे स्वाहा ॐ महातार्क्ष्याय शिखायै वौ
षट् ॐ खगोत्तमाय कवचाय हुं ॐ छंदोमया
य नेत्रत्रयाय वौषट् ॐ नागालंकृतशरीराय अ
स्त्राय फट् ॐ अथ ध्यानं हिमाद्रिशिखराका
रं पूर्णचंद्रनिभाननं दीर्घबाहुं वृषस्कंधं ना
गाभरणभूषितं अनंतो वामकटिकाय ज्ञसू
त्रं तु वासुकिः तक्षकः कटिसूत्रं तु हारः कर्कोट
च्यते पद्मस्तु दक्षिणे कर्णे महापद्मस्तु वामतः
शंखपालः शिरोदेशे कुलिकस्तु भुजांतरे एवं
ध्यायेत्रिसंध्यादात्मानं गरुडं पिणं विषंल्ला रू
शयति क्षिप्रं वायुः शीघ्रमिवांबुदं सूर्यमंडल
संकाशो सोममंडलमध्यगः पृथ्वीमंडलमुद्रायां
वह्निहुं फट् स्वाहा आजानुकांचनवर्णाभमा
नाभेस्तु हिमप्रभं आकंठात्कुंकुमाभमास्
योजनसन्निभं यो विश्वप्राणभूतस्तनुरपि च
हरेर्यानकेतुस्वरूपो यं संचिंत्यैव सद्यः स्वयमुरग
वधूवर्गगर्भाः पतंति चंचच्चंडोरुतुंडत्रुटितफ
णिवसारक्तपंकांकितास्यं वंदे छंदोमयं तं ख
गपतिममलस्वर्णवर्णं सुपर्णं ॐ नमो भग

वतेगरुडाय श्री विष्णुवरवाहनाय त्रैलोक्यप
रिपूजिताय वज्रनखवज्रतुंडाय वज्रपक्षाल
कृतशरीराय आवेशय आवेशय एह्येहि म
हागरुड दुष्टविषं छिंधि२ आवेशय २ एह्येहि
महागरुड दुष्टराक्षसान् छिंधि२ आवेशय२ ए
ह्येहि महागरुड बद्धो हुं फट् स्वाहा एवमधिका
रसंपत्यर्थे देवतारूपमात्मानं संपादयेत ॐ
ब्रह्मविद्यां प्रवक्ष्यामि ब्रह्मा नारदाय नारदो२
बृहत्सेनाय बृहत्सेनो बृहस्पतये बृहस्पतिरि
न्द्राय इन्द्रो भरद्वाजाय भरद्वाजो जीवितकामिभ्यः
शिष्येभ्यः प्रायच्छत ॐ तत्ते कारी मत्ते कारि१
विषहारी विषदूषिणी विषनाशिनी विषसर्पि
णी प्रणष्टं दो विषं हतं ते ब्रह्मणा विषं हतविषं
नष्टं विषं हतमिन्द्रस्य वज्रेण स्वाहा नागानां स
र्पाणां वृश्चिकानां लूतानां प्रलूतानां गोधानां
महागोधानां मूषकाणां स्थावराणां जंगमानां
यद्यनंतकदूतस्त्वं यदि वानंतकः स्वयं यदि वा
सुकीदूतस्त्वं यदि वा वासुकिः स्वयं यदि तक्षक
दूतस्त्वं यदि वा तक्षकः स्वयं यदि कर्कोटिकदू
तस्त्वं यदि वा कर्कोटिकः स्वयं यदि शंखपुलिक
दूतस्त्वं यदि वा शंखपुलिकः स्वयं यदि पद्मक
दूतस्त्वं यदि वा पद्मकः स्वयं यदि महापद्मक
दूतस्त्वं यदि वा महापद्मकः स्वयं यदि एलाप
त्रकदूतस्त्वं यदि वेलापत्रकः स्वयं यदि महे
लापत्रकदूतस्त्वं यदि वा महेलापत्रकः स्वयं
यदि कंबलाश्वतर दूतस्त्वं यदि वा कंबलाश्वतरः
स्वयं यदि कालिकदूतस्त्वं यदि वा कालिकः२
स्वयं शाडूमांम महाविद्यां ममावास्यायामश्र
यात्तद्वादशवर्षं न तं दशंति सर्पाः यः इमां म
हाविद्यां ममावास्यायामश्रीयानो धारयेद्धा

यावज्जीवंनतंदशंतिसर्प्पाः अष्टौब्राह्मणा
न्ग्राहयित्वातत्क्षणेनमोक्षयतिकाष्ठेनमोक्ष
यतिशतंब्राह्मणान्ग्राहयित्वाचक्षुषामो
क्षयतिसहस्रंब्राह्मणान्ग्राहयित्वामनं
सामोक्षयतीत्याहभगवान्ब्रह्मेति २इत्यथ
र्ववेदेगरुडोपनिषत्समाप्ताः शुभंभवतु